CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 268

Title Sabdarth Sara Manjari

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 268 Subject:

Title: Śabdārthasāra Manjarī

Author: Bhavānand Siddhānta Vāgiśa Scribe:

Date of the work: — Date of the Ms.: V.S. १९६२

Place of the work: — Place of the Ms.: —

Size: 10·1" by 3·7" Extent: 15 folls.

Language: Sanskrit Script: Devanāgarī

Remarks: —

श्रीगणेशाय नमः ॥ नत्वा कृष्णपदद्वंद्वं कारकार्थविनिर्णयः ॥ श्रीभवानंदसिद्धांतवागीशेन वितन्यते ॥ तत्र क्रियान्वयित्वं कारकत्वं निमित्त
सामान्यलक्षणं । संप्रदानादेरनुमतिप्रकाशनद्वारैव तंडुलादिसंपादनद्वारेव संबंधिनो पि पाकादिक्रियानिमित्तत्वे न चैत्रस्य तंडुलं प
चतीत्यादौ चैत्रादावतिव्याप्तेः ॥ किंतु विभक्त्यर्थद्वारा क्रियान्वयित्वं तु स्वमात्रसाधारणं कारकत्वं क्रियानिमित्तत्वं तु स्वत्वनिरूपि
तत्वं पचतीत्यादिक्रियाविशेषणे ऽतिव्याप्तिवारणाय विभक्त्यर्थद्वारेति ॥ चैत्रस्य पचतीत्यादौ चैत्रसंबंधितंडुलपाकेनान्वेति षष्ठ्या नाम
र्थेन सह ... क्रियायाः अधिकरणादिकारकसाकांक्षत्वात् परस्परसाकांक्षाविरहात् ॥ किंतु तंडुलमिति पदाध्याहारेण चैत्रस्य तंडुलं पचती
त्येवान्वयबोधः ॥ ओदनस्य भोक्ता चैत्रस्य पाक इत्यादौ कर्मत्वकर्तृत्वे कृद्योगे न कारकविभक्तिरेव षष्ठी कर्मणोः कृतीति सूत्रेण तद्विधानात् ॥ अत
एव संबंधस्य कारकत्वं नास्ति क्रियान्वयित्वाभावात् इति शाब्दिकाः ॥ यदि च ... रूपं पचति दुर्गतानां प्रतिकृतीर्भिषक् स्वनेपथ्ये रिक्ता इति प्रयोग
विनापि नाम्नाध्याहारं षष्ठ्यर्थसंबंधो ऽन्वीयते तदा कर्तृत्वकर्मत्वादिषष्ठ्यन्तमद्वारा क्रियान्वयित्वं कारकत्वमिति तु तल्लोऽत्र
क्रियान्वयित्वं कर्तृत्वमिति वैयाकरणाः ॥ तेषां मते यथाशयः ॥ यद्धातुं तत्र व्यातेनयुग्मा घसमभिव्याहृते तेनैव धातुवर्थान्वितयत्नवत्त्वं बो
ध्यते ॥ तदा च धर्मेव तत्त्वमेव तत्र क्रियाकर्तृत्वं ॥ एवं च पचतीत्यादौ पाकानुकूलव्यापारवत्त्वं नानातीत्यादौ ... त्याश्रयत्वं नश्यतीत्यादौ प्र
तियोगित्वं तत्तत्क्रियानिरूपितं तत्तत्कर्तृत्वं ॥ यत्र घसमभिव्याहृतेति करणत्वं पचतेः तंडुलं इत्यादौ पाकजन्यफलाश्रयत्वेन तंडुला
देर्विधानान्न कर्तृत्वं ... स्यात् ॥ स्थाली पचतीत्यादौ करणाधिकरणकर्मणां क्रियान्वितत्वे धर्मे वत्वेपि सधर्मिनाख्यातेन प्रतिपाद्य ॥ २ ॥

तीयादितो विषयित्वोपस्थितौ घटविषयिज्ञानाश्रयतावानित्यन्वयबोधात् ॥ अत एव यत घातोरर्थफलं तदुपस्थितमले
कानाधिस्यादेः ... नैवान्वयबोधात् ॥ अमुं जानीयेयत तदिति प्रयोगात् ॥ अत एव तादृश धातुके ... कर्मप्रत्ययाभावात् भो
जनं यत तद्रीतिनप्रयोगः ॥ तत्र भूमिं प्रयातीतितत्स्वजनति स्वमदुद्धादौ धात्वर्थभावच्छेदकसंयोगविभागादिरूपफलशा
लित्वेपि स्वस्य स्वत्वात् प्रयाति त्यजतीत्यप्रयोगः ॥ ... धात्वर्थपरसमवेतत्वमपि विशेषणं देयं ॥ नचैवमुभयकर्मजस्य
लेमल्लोमल्लं गच्छतीतिवत्तमल्लः स्वात्मानं गच्छतीति प्रयोगः स्यात् ॥ भूमिं प्रयातीत्यादितो हि द्वितीयादिनापरत्वप्रकारत्व
र्योपेसिकेवाच्यतेतथाच भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनकस्पंदानुकूलकृतिमानित्यन्वयबोधः ॥ स्वात्मानं
गच्छतीत्यादौ स्वात्मभिन्नसमवेतस्वात्मवृत्तिसंयोगजनकयन्मल्लात रगमनेतदनुकूलकृतिमत्वस्य स्वात्मनो मा
वे ... नतिप्रसंगात् ॥ अत्र प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन नपरत्वे ऽन्वयः ॥ पृथिवी प्र
यातिविहंगइत्यादौ विहंगस्य पृथिवीत्वावच्छिन्नभिन्नत्वाभावादनन्वयापत्तेः ॥ प्रतियोगितासामान्येनान्वयेन तु तेनापि
प्रतियोगिकद्विलावच्छिन्नभिन्नभिन्नत्वात्तथैव दोषात् ॥ अतो द्वितीयार्थफलेयत्र ... केनान्वयस्तत्प्रकृतितावच्छिन्नजाति
त्वानितासंबंधेनप्रकृत्यर्थस्य कर्मत्वात् तार्थफलान्वयिनःस्वपरत्वे ऽन्वयः ॥ पृथिवीं प्रयातीत्यादौ यत पृथिवी ...

कारक·वा·
॥३॥

वृत्तिसंयोगजनकत्वं प्रयाणस्य गमनवृत्तिविषयस्तस्य च क्रियाभिन्नत्वं विहगे वर्तते इति न कोऽपि दोषः। पृथिवीं प्रयातीत्यादौ च
खंडस्यैव पृथिवीपदार्थत्वात् न तु वृक्षविहगसाधारणपृथिवीत्वेन जात्यवच्छिन्नस्य तथा चान्वयितावच्छेदकावच्छिन्नप्र
तियोगिताकत्वस्य सुघटत्वात् पिनष्टीति। एवमव्याप्यकर्मवाचकसामान्यपदेन लक्षणया विशेषपरत्वं सप्रपञ्च
मित्याहुः। यत्तु तत्क्रियानधिकरणत्वे सति क्रियावच्छेदकफलशालित्वं कर्मत्वं द्वितीयादेरपि क्रियानधिकरणत्वमर्थ
इति तन्न। क्रियाव्यक्तिभेदादनतिशक्तिकत्वमपि तेः। वस्तुतस्तु अन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयि द्वि
तीयादेरर्थः। तथा च द्वितीयायाः फलपदार्थैकदेशे अन्योन्याभावे चैकत्वके स्वप्रकृत्यर्थस्य कर्मीभावात् अर्थफला
न्वयिनश्चाधिकरणत्वेनान्वयः। एवं च ग्रामं प्रयातीत्यादौ ग्रामसंयोगजनककर्मभिन्नत्वं स्पन्दान्योन्याभावप्रतियोगिता
वच्छेदकप्रयाणानुकूलकृतिमानित्यन्वयधीः। आत्मवृत्तिक्रियायाः स्पन्दत्वान्योन्याभावप्रतियोगितानवच्छेदकत्वात्
त्यागात्मानं प्रयातीत्यादौ न प्रसङ्गः। एवं ददादेरपि लक्ष्यत्वं विनास्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागोद्दानीय
जनते वदन्तो द्देश्यकस्वस्वत्वध्वंसफलकत्यागः। जुहोतेश्च तादृशत्यागफलकाग्निप्रक्षेपः। अत एव वह्निक्षिप्तं तादृश
त्यागाभावेऽपि हुतं। अग्निप्रक्षेपश्चाग्निवृत्तिसंयोगानुकूलक्रियानुकूलो घटादिवृत्तिनोदनादिव्यापारः। न चैवं व

राम
॥३॥

ह्नौ जुहुयादित्यत्र अग्निवृत्ति अग्निसंयोगानुकूलक्रियानुकूलघटादिवृत्तिनोदनादिव्यापारस्यादित्वाद्वह्नेरपि पुनरु
क्तिर्निर्बन्धनो नन्वयोः धात्वर्थतावच्छेदकसंयोगात्मकफलशालित्वेनाग्नेरपि कर्मत्वापत्तिरिति वाच्यं तत्र संयोगावच्छि २२
न्नक्रियानुकूलव्यापारस्यैव धात्वर्थतया अग्नेः तदंशे भावात्। तत्र क्रियाया एव धात्वर्थतावच्छेदकतया तदन्वयि नोप्यग्नेः
कर्मत्वाभावेन द्वितीयदोषस्याप्यभावात्। द्वितीयायाश्च वृत्तित्वं तत्र धात्वर्थतावच्छेदके चेति। एवं च विप्राय गां ददा
ति विभक्त्यर्थजनते घटं तत्र होतीत्यादौ विप्रोद्देश्यकगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वफलकत्यागानुकूलकृतिमान्
वह्न्युद्देश्यकस्वस्वत्वध्वंसफलकत्यागानुकूलकृतिमान् घटः तत्र अग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारानु
कूलकृतिमानिति क्रमेणान्वयबोधः। अत्र देवतायाश्च स्वत्वस्वीकारत्वं तत्र द्वितीयार्थः इति तात्पर्ये नैव विसर्गः कर्मत्वं।
इतरस्यात्तदुद्देश्यतासंबन्धेन तादृशस्वत्वध्वंसरूपधात्वर्थतावच्छेदकफलवत्त्वात् कर्मत्वं। अत एव मन्त्रकरणकहवि
स्त्यागभागित्वेनोद्देश्यत्वं देवतात्वमिति मणिकृतः। तस्य च जुहोत्यर्थतावच्छेदकीभूताग्निसंयोगानुकूलक्रियाव
त्त्वात् कर्मत्वं। स्वग्रहणप्रयुक्तस्वस्वत्वध्वंसपूर्वकपरस्वत्वजनकस्त्यागो विक्रयः। मूल्यदानपुरःसरस्वस्वत्वो
त्पादकस्वीकारः क्रयः। द्रव्यस्वत्वजनकस्वीकारः प्रतिग्रहः। गवां विक्रीणाति गां क्रीणाति प्रतिगृह्णातीत्यादौ गोरु

गो॰वृत्ति

कारकवाद॰ तिमत्त्यागरूपार्थप्रयुक्तस्वस्वत्वध्वंसपूर्वकपरस्वत्वावच्छिन्नत्यागानुकूलकृतिमानिति गोवृत्तिमत्त्यदानप्रयुक्तस्वत्वा
॥५॥ वच्छिन्नस्वीकारवान् दानप्रयुक्तस्वत्वजनकस्वीकारवानिति क्रमेणान्वयधीः सर्वत्र धात्वर्थतावच्छेदकतत्तत्फलाश्र
यत्वेन गवादेः कर्मत्वाद् एवमत्र गत्यर्थेव दिशा सर्वत्र कर्मत्वमूह्यम् । नन्वेवं पतत्यर्थः संयोगावच्छिन्नस्पन्दार्थकतया तदवच्छे
दकीभूताधःसंयोगवत्त्वाद् भूतलादेः कर्मत्वेन तद्वत् पर्णं भूतलं पततीत्यादिप्रयोगः स्यादिति वाच्यम् । तथाविधविवक्षा
या इष्टत्वात् । अत एव द्वितीयाश्रितातीतपतितेत्यादिपतितशब्दप्रयोगे द्वितीयातत्समासविधानं नरकं पतितो नरक
पतित इत्युदाहरणं च साधु संगच्छते केचित्तु सम्यगपि साधुः भूतले पततीति खगो ग्रामे गच्छतीतिवत् । अन्ये तु तादृ
शफलशालित्वेपि भूतलादेर्न द्वितीया फलस्य हि संबन्ध्याकांक्षायां भूतलादेरन्वयो बाध्यः । प्रकृते अधःसंयोगरू
पफलस्याधोवृत्तित्वाद्युपस्थितेराश्रयान्तरनिराकांक्षत्वात् । यद्वा पतिधातोः कर्मकत्वं कस्मिन्नपि नास्ति फला
वच्छिन्नव्यापारबोधकस्यैव धातोः सकर्मकत्वात् । यथा ग्रामं गच्छतीत्यादौ गमधातोः पतिर्हि पर्णगतमधःसंयोगमेव
बोधयति । ननु भूतलं गतो भूतलस्याधःसंयोगाभावात् । पर्णस्याधो भूतलमिति त्वन्यदेतत् । अत एव भूतले पतती राम
त्येव प्रयोगो न तु भूतलं पततीत्याहुः । प्राञ्चस्तु ग्रामं गच्छति त्यजति गम्यते त्यज्यते वा ग्रामः इत्यादौ संयोगविभागयोः ॥५॥

त्येवप्रतीतेः २

फलयोर्द्वितीयाकर्मत्वाभ्यां प्रत्यायनात् अन्यलभ्यस्पन्दात्मकव्यापारस्यैव तत्र धात्वर्थत्वात् । न चैवं तद्धातुयोगे द्विती
यादिना संयोगत्वादिना फलविशेषबोधकत्वोपगमे तथा ग्रामं गच्छति त्यजति वा ग्राममित्यत्र संयोगजनकस्पन्दस्य ग्राम
वृत्तिविभागजनकस्पन्दस्य च लाभात् । पर्यायतया वारणे विगच्छति त्यजति गमनं त्यागश्च अनयोः पर्यायता स्यादिति वाच्यम् ।
संयोगावच्छिन्नस्पन्दत्वस्य गमेर्विभागावच्छिन्नस्पन्दत्वस्य त्यजेश्च कार्यतावच्छेदकत्वात् । एवं च यथा यथा
संयोगविभागावच्छिन्नस्पन्दलक्षणं विनापि गच्छति त्यजतीत्यनयोर्बोधकत्वमेवासंयोगावच्छिन्नस्पन्दत्वेन
जन्यजनकभावसंबन्धेन संयोगादिस्पन्दान्वये शिष्यावगाहित्वात् । तेन गम्यते त्यज्यते ग्रामः इत्यादौ स्पन्दविशेष
णत्वकर्मत्वात् संयोगादिविशेष्यकशाब्दस्य संग्रहः । भावे स्यात् तस्मिन् तु गमनमित्यादौ विभक्तसंयोगावच्छिन्नस्प
न्दार्थे तात्पर्ये वा न चैवं लक्षणयापि त्यजिगम्योर्गोभ्यां यागमनयोर्बोधप्रसङ्ग इति वाच्यम् । शक्तिलक्षणान्यतरसंबन्धेन सं
योगावच्छिन्नस्पन्दबोधकत्वानुपपत्तेर्निरुक्तयोः तदा वगम्यादिना संयोगावच्छिन्नस्पन्दबोधनात् । एवं च पर समवे
तत्वकालत्वान्वयि फलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वम् । अत एव गमधातोः पूर्वदेशे न कर्मत्वं तस्य विभागा[illegible] रूप
फलेनान्वयात् । एवं पतेरपि गुरुत्वासमवायिकारणकाधोविजातीयस्पन्दार्थः । तस्य अधःसंयोगरूपफलेनैवान्

श्रि

कार॰वा॰ यः। एवं द्दा तेरपि व्यापारमात्रार्थत्वेन तत्तत्फलविशेषान्वयबोध्य इत्याहुः। कर्म त्रिविधं। प्राप्यं विकार्यं निर्वर्त्यं चेति। संयो-
॥५॥ गादिफलशालि प्राप्यं यथा ग्रामं गच्छतीत्यादौ ग्रामादिः। क्रियाप्रयुक्तं नाशकं फलं जनयति तद्विकार्यं काष्ठं लुनातीति
इत्यत्र लक्षणया काष्ठपदेन अवयवा उच्यन्ते। लुनातिना चावयवसंयोगविरोधिविभागहेतुः कुठारादिव्यापारः। तत्राव-
कोडावमववृत्तिनाशविभागावच्छिन्नव्यापारानुकूलकृतिमानिति लन्वयधीः। एवं च प्राप्यविकार्ययोः कारकत्वान्नादः-
शफला असत्ता च मुख्यकर्मत्वान्निर्वर्त्यं च निष्पाद्यं। यथा कटं घटं वा करोतीति। अत्र च कृञ्धातोः फलावच्छिन्नव्यापा-
राबोधकत्वात् कुलादेस्तादृशफलानाश्रयत्वेन गौणं कर्मत्वं। तत्र साध्यत्वेन विषयत्वं वीरणादेरुपादानत्वेन विषयत्वे- अत एव
पि वीरणं करोतीति न प्रयोगः। प्रा[illegible]स्तु। कटादेर्गौणकर्मत्वे पि कारकत्वोपपत्त्यै अवयवे लक्षणा। कटस्याप्रसिद्धत्वेना-
कारकत्वात्। न चैवं कटाद्विदारं करोतीति मुख्यतः प्रयोगः स्यादिति वाच्यं। करोतिपदसमभिव्याहारे कर्मवाचकपद-
दि२ स्यावयवे निरूढलक्षणा नियमादित्याहुः। ओदनं पचतीत्यादौ ओदनपदस्य तण्डुले तदवयवे वा लक्षणा। धातुना च
रूपादिपरावृत्तिफलकोऽग्निसंतापनादि। तथा च तत्तद्धात्वर्थतावच्छेदकरूपादिपरावृत्तिशालित्वात्कर्मत्वं। अत्र चप- राम
वेलपविरोध्येन रूपान्तरापत्तिर्यद्धि विकारस्तद्धि विकार्यं मध्ये। अन्यथानुप्राप्यमध्ये अस्यान्तर्भावः। सोकं पचतीत्यादौ ॥५॥

क्रियाविशेषणे द्वितीया विशेषणविभक्तिवत्प्रयोगसाधुत्वाय। धात्वर्थस्तोकस्य नामार्थस्याभेदः संसर्गः। नामार्थधात्वर्थ-
योर्भेदान्वयबोधस्य एवं प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात्। नीलं घटमित्यादौ विशेषणविभक्तेरभेदार्थकत्वेन तस्या
अपि अभेदार्थकत्वं। करणत्वं च कारकान्तरेण चरितार्थत्वे सति फलहेतुत्वं। तत्र चरितार्थत्वं च व्यापारमुखाद्येव फलहे-
तुत्वं। कर्त्री हि सिद्धः कुठारादिव्यापारयत्नविच्छिन्नलक्षणं फलमुत्पादयतीति करणे चरितार्थं न तु फले कर्मापि करणे चरिता-
र्थं। कर्मापि सिद्धो करणव्यापारादिसिद्धः। न हि छेद्याप्रसिद्धौ कुठारादीनां करणानां छिदनुकूलव्यापारः संभवति। अत एव
करणव्यापारविषयत्वं कर्मत्वमिति प्राञ्चः। अधिकरणमपि कर्तृकर्मान्यतरव्यापारद्वारा क्रियानिष्पादकं। यथा गे-
हे चैत्रः स्थाल्यां तण्डुलं पचतीत्यत्र चैत्रव्यापारसंपादनेन गेहः तण्डुलव्यापारसंपादनेन तस्याः। अकारकत्वं संप्र-
दानापादानयोः अन्तक्रियासामान्यहेतुत्वं। किं तु दानेन न तु अनुमतिप्रकाशनेन कर्तुरिच्छामुखाच्च संप्रदानस्य पतना-
श्रयं च पर्णआदेः पतनप्रतिबन्धकसंयोगविनाशकविभागहेतुत्वाच्चापादानस्य चरितार्थत्वेमेवेति। करणं च कारका-
न्तरेन चरितार्थत्वस्य चरमकारणत्वात्। एवं च तदनुकूलव्यापारमद्वारीकृत्य सन्त्रिकं वा कुत्वं फलायोगव्यवच्छिन्न
कारणत्वमर्थवसितकरणत्वमिति लभ्यं। एवं च तन्मते चरमकारणमेव करणं कुठारादौ करणपदं गौणमिति। वे

स्तुतस्तु व्यापारवत्कारणं करणं तेन हस्तादेः कुठारादौ च नाव्याप्तिः। न चैवमदृष्टद्वारा कार्यमात्रे विशेषतो ज्ञानेच्छा
||८|| दीनां मनोयोगद्वारा ज्ञानः करणत्वापत्तिः। उपध्येयसंकरस्येष्टत्वात्। अनुकूलकृतिमत्त्वमवाप्यैव लक्षणाकर्तृत्व
स्यनिरूपककरणत्वादन्यत्वे नैव उपाध्योरसंकरात्। कर्तृभिन्नत्वेन करणलक्षणं विशेषणीयमित्यपि कश्चित् तदसत्
वानुमितौ व्याप्तिस्मृतिः करणं परामर्शो व्यापारः वाप्यनुपादे व्याप्युपादिज्ञाने च वस्तुयादि संयोगः श्रोत्रस्य व्यापारो
ने श्रोत्रमनःसंयोगश्च न तु शब्दो व्यापारः शब्दाभावप्रत्यक्षे तस्य व्यभिचारात्। न च शब्दश्रावणे शब्दो व्यापारः लाघ
वात् श्रावणत्वावच्छिन्नं प्रत्येव श्रोत्रत्वेन हेतुत्वान्न तु शब्दश्रावणत्वावच्छिन्नं प्रतियोगित्वात्। अन्ये तु कुठारादौ करणे
कर्तृव्यापारविषयत्वं करणत्वं। तच्च फलानुकूलकर्तृव्यापारवत्त्वं कुठारादौ छिदानुकूलकर्तृसंयोगे तन्तवमाना
मनादिसत्वमविकलं। न चैवं स्थाल्यादेरपि करणत्वापत्तिः कर्तृव्यापारीयत्वं। तथापि व्याप्तिः उपध्येयसंकरस्येष्टत्वात्
छिदादौ चेष्टायाः प्रयत्नरूपकर्तृव्यापारविषयत्वेन हस्तादेः अन्यथा चेष्टावत्त्वेन च करणत्वमपि सिद्धमेवेति। चेष्टा
हस्तादिनाच्छिनत्तीति प्रयोगस्य सर्वसम्मतत्वात्। कर्मादौ विवक्षावशात् प्रयोगो भवत्येवेति। तण्डुलेन स्थाल्या वाल्ल राम
साधयति गवा दानं साधयति बालेन दानं साधयतीत्यादिप्रयोगात्। चैत्रस्यालेना चैत्रेण काष्ठचलतीत्यप्रयोगात् नाके ||८||

त्तुः शरीरस्य च वारणाय द्रव्यासमवायिकृतिमद्भिन्नत्वं विशेषणं देयं। कृतिमत्त्वं च समवायेनावच्छेदकतया बोध्यं।
तेनात्मत्वेन मनःशरीरस्य च न कुठारस्य विशिष्टाभावाच्च हस्तादिसंग्रहः। इदं च न व्याप्तिसस्यादिसाधारणं तत्र च पूर्वनिरूप
मेव करणत्वं हस्ते च करणपदं नानार्थमेवेत्याहुः। परशुना छिनत्तीत्यादौ निरूपकं करणत्वं तृतीयार्थः प्रकृत्यर्थस्य तत्रा
न्वयस्तेन धात्वर्थस्य च छिदादेर्निरूपकत्वेनान्वयः। इत्थं च परशुनिष्ठकरणतानिरूपितछिदानुकूलकृतिमानित्य
न्वय इति प्राञ्चः। परशुना छिनत्ति न हस्तेनेत्यादौ निरूपकत्वादेः संसर्गस्य प्रतियोगितावच्छेदकसंसर्गत्वाभावान्नञर्था
न्वयानुरोधेन निरूपकतानिरूपितजन्यत्वमेव तृतीयार्थः। तत्र च निरूपकतया प्रकृत्यर्थस्य वा अन्वय तथा धात्व
र्थस्यान्वयः। इत्थं च परशु[redacted] निरूपितजन्यताश्रयछिदानुकूलकृतिमानित्यन्वयधीरिति नव्याः। जटादि
तृतीया स्तापसमद्राक्षीदित्यादौ न करणत्वं किन्तु विशेषणत्वे तत्र च प्रकृतेर्वैशिष्ट्यं जटाभिस्तापसमिति सस्य जटाविशिष्टं तापः
सम्बन्धिः सर्पः। अत्र चोपलक्षणत्वेऽपि भानात् उपलक्षणत्वं च बोध्यव्यावर्त्तनावच्छेदकत्वे सति तन्मात्राधिकरणत्वं ज
टाया अतापसव्यावर्तनानवच्छेदकत्वात्। शमदमादिमत्त्वस्यैव तापसव्यावर्त्तकस्य नानातिरिक्तवृत्तित्वेनावच्छेदकत्वात्
। न चैवं शमदमादिमान् तापस इति न स्यात्। इष्टत्वात्। विवक्षावशात्तु तत्प्रयोगस्य सत्त्वे च विशेषणेऽप लक्षणसाधारणं

वैशिष्ट्यमात्रं। न तूपलक्षणत्वमपि नियामकमिति। अक्ष्णा काणः। पादेन खञ्जः। मुखेन त्रिलोचन इत्यादौ येनाङ्गविका
॥८॥ र इति सूत्रेण तृतीया। येनाङ्गेन विकारो हानिराधिक्यं वा तदङ्गवाचकात् तृतीयेति सूत्रार्थः। इत्थं च तृतीयायाः शक्तिर्वि
मर्थः। तत्र अक्षुसन्निवेशविशेषात्मककाणादिपदार्थैकदेशविकार एवान्वेति। काणत्वं च बहिरवच्छेदेन चक्षुःशून्यगोलक
वत्त्वं। अत एव सन्नोऽथस्या काणत्वेन चक्षुष्मद्गोलके सतीति विशेषणीयं। एके नार्थेन वा चक्षुषा पश्यन्त्यपि काण
एव एकगोलकेऽपि गोलके वा चक्षुरभाववत्त्वात्। गोलकोपघातेऽपि काण एव तदवच्छेदेन चक्षुरभावादिति। यदि वे
तद्गोलकावच्छेदेन चक्षुषः सत्त्वेऽपि घातादेव न तत्र चाक्षुषं जनयेत् तदा गोलकत्वमेव काणत्वं। अक्ष्णेति पदसम
भिव्याहारस्थले च काणपदं चक्षुःशून्यत्वविशिष्टस्य तत्त्वविशिष्टस्य बोधकं। अक्षिपदं च पदार्थैकदेशचि
क्षुष्मद्गोलकपरं। एवं च तादृशगोलकवन्नियतचक्षुःशून्यत्वं उपघातो वा तादृशविशिष्टवानिति अक्ष्णा काण इति वाक्या
र्थः। एवं खञ्जत्वं तथाविधसंस्थानशून्यपादवत्त्वं पादेनेत्यादिसमभिव्याहारस्थले च तादृशसंस्थानशून्यत्ववान
खञ्जपदार्थः। तथा च पादवृत्ति यत्तथाविधसंस्थानशून्यत्वं तद्विशिष्टवानित्यर्थः। त्रिलोचन इत्यस्य च बहुव्रीहि राम
णा लोचनत्रयवानित्यर्थः। तथा च मुखवृत्तिलोचनत्रयवानिति मुखेन त्रिलोचन इति वाक्यार्थः। एवमन्यत्राप्यूह्यं ॥८॥

ह्यं। अक्ष्णा काण इत्यादौ पूर्वनिरुक्ता एव पदार्थाः। तृतीयार्थोऽभेदः। तथा च तादृशगोलकाभिन्नं यच्चक्षुःशून्यमुपहितं वा तद्वा
निति वाक्यार्थः। मुखेन त्रिलोचन इत्यत्र तु त्रिलोचनपदं लोचनत्रयविशिष्टवत्परं। तथा च मुखाभिन्नलोचनत्रयविशिष्ट
वानिति वाक्यार्थ इति। एवं पादेन खञ्ज इत्यादावपि बोध्यं। इति ज्ञापितार्थेन कुलमित्यादौ हेत्वर्थे तृतीया। कर्तृकरणयो
स्तृतीयेत्यत्र क्रियासाकांक्षेति करणत्वे तृतीया विहिता। अत्र तु नामार्थेनापि साकांक्षो हेतुत्वसामान्ये हेताविति सूत्रे
ण तृतीयेति भेदः। पुत्रेण सहागत इत्यादौ तृतीयायाः कर्तृत्वमर्थः। सहशब्दस्य समभिव्याहृतक्रियायामागमनादि
तत्र चैककालीनदेशावच्छेदेन एककालीनत्वसंबंधेन समभिव्याहृतक्रियायामन्वयः। एवं च पुत्रकर्तृ
कागमनसमानदेशकालीनागमनकर्ता इत्यन्वयः। वस्तुतस्तु सहशब्दस्यापेक्षाबुद्धिविशेषविषयत्वादिरूपसा
हित्यमर्थः। तृतीयार्थः वृत्तित्वं संख्यामात्रं वा। सहार्थस्य च संबंधः। प्रकृते तेन तृतीयान्तेन समं वाक्यार्थः। निपाता
तिरिक्तनामार्थयोरभेदान्वयस्य विभक्त्यर्थद्वारकत्वात्। साहित्यावच्छेदेन सर्वत्र विधेयान्वयः। एवं च पुत्रेण सहा
गतः पिता इत्यस्य पुत्रवृत्तिसाहित्यावच्छिन्नपित्रागमनकर्ता इत्यन्वयधीः। तेन शिष्येण सहोपाध्यायो गतः।
सुन्दर इत्यादौ द्वयोर्गुणविधेयस्थले अनन्वयः। सहैव दशभिः पुत्रैर्भारं वहति गर्दभी इत्यादौ पुत्रभारवहनकर्त्री।

कारक॰
॥८॥

भावेपितादृशप्रयोगात् । एकदेशविशेषणान्वयेनैवाहारेण एकदेशविशेषणान्वयाप्रयुक्तत्वात् । तस्यावच्छेदकतयान्वय
अतएवाविद्यमानसहार्थे तृतीयेति शाब्दिकाः वदंति । चान्ये नञ्चनीर्गोश्चैणगार्ग्यैः प्रकृत्यामिरूपकदृष्टपोप्रकृत्यादि
त्वस्यैवान्वये नञ्तृतीया । ननुदार्थिकाधान्यामित्येवं न वानिति । गार्ग्यैर्वगार्ग्यकुलेस्वन्तः गोत्राणि नगार्ग्यकुलेस्वन्तं इति
बोधः । प्रकृतिपदस्य साहजिको ऽभिरूपपदस्य रमणीयता वानि स्वर्थः । तत्यावस्या हजिकाभिन्नरमणीयतावानि त्यर्थः
कर्मणा यमभिप्रैतिस संप्रदानमितिपाणिनिसूत्रात् तत्क्रियाकरणीभूतेन तत्क्रियाकर्मणा यं संबंधी कर्तुमभिप्रै
ति कर्त्ता स संप्रदानमिति सूत्रार्थः । एवं च करणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वं इति पर्यवसितं तथा
मंगच्छती त्यादौ गमनकर्मग्रामजन्यसुखादिभागित्वेनोद्देश्यस्यैवाद्देः क्रियायाः संप्रदानत्वाभावात् द्वारणायक
रणीभूतेति । तत्र गमनेग्रामस्याकरणत्वात् । दानोदेवेभ्यादिकरणमितिलक्षणसमन्वयः । अविप्रायगां ददानीत्यादौ
जन्यफलप्रकारकेच्छापूर्वकत्वं चतुर्थ्यर्थः । व्युत्पत्तिवैचित्र्याच्चतदंशे जन्यत्वे प्रकृत्यर्थस्याविकर्मणोगवादेर्निरू राम
पकतासंबंधेनान्वयः स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागोदानार्थः । कृतिश्चाख्यातार्थः । एवं च विप्रविष ॥८॥
यकगोजन्यफलप्रकारकेच्छापूर्वको गोनिष्ठस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानुकूलकृतिमानित्यन्वय

धीः । पितृस्वर्गमुद्दिश्यकृते गोदाने दानजन्यफलभागित्वेन पितोद्देश्यत्वात् तत्जन्यफलभागित्वेनेति पितुर्जातेन संप्रदानत्वं । यदि
दत्तागौः पितुः स्वर्गमुद्दिश्य साद्यावध्वनी त्यस्मिंसंविक्तेदाप्रदृष्टावारकताद्दशकर्मजन्यत्वं वाच्यं केचित्तु । चोत्वर्थतावच्छेदक
त्वेन फलं विशेष्यं निरूपितत्वेनेच्छाविषयो गोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानुकूलकृतिमानित्यन्व
यधीः । जन्यस्व ४ निरूपितत्वेनेच्छाविषयत्वं चतुर्थ्यर्थः । स च धात्वर्थतावच्छेदकेऽन्वेति । एवं च विप्र ४ त्वस्यगोवृत्तित्वे
च्छेत्यर्थः संज्ञान्यत्वमपि लभ्यत एवेति तादृशगोजन्यस्वत्वनिरूपकत्वेनोद्देश्यत्वं विप्रस्य । एवं च वृक्षायोदकमासिं
चतीत्यादौ संयोगावच्छिन्नद्रवद्रव्यक्रियावच्छिन्नव्यापारो धात्वर्थः । वृत्तित्वेनेच्छाविषयत्वं चतुर्थ्यर्थः । स च धात्वर्थता
वच्छेदकसंयोगान्वयि । वृत्तित्वरूपद्वितीयार्थोपि तादृशद्रवद्रव्यक्रियायां । एवं च वृक्षवृत्तित्वेनेच्छाविषयसंयोगानुकूलजल
वृत्तिद्रवद्रव्यक्रियावच्छिन्नव्यापारानुकूलकृतिमानित्यन्वयधीः । न चैवंसिंचधात्वर्थतावच्छेदकद्रवद्रव्यक्रियायां द्विती
यार्थवृत्तित्वान्वये पयसावृक्षमासिंचतीति प्रयोगोनस्यात् तत्र करणक्रियायां वृक्षावृत्तित्वादितिवाच्यं तत्र धात्वर्थता
वच्छेदकीभूतसंयोग एव वृक्षवृत्तित्वान्वयात् द्रवद्रव्यसंयोग एव तत्र धात्वर्थ इति तन्न युक्तं तथासति फलावच्छिन्नव्या
पारबोधकत्वस्य धातोः कर्मकत्वधात्वर्थतावच्छेदकफलशालित्वं भावेन वृक्षादेः कर्मकत्वापातात् । अतएवस्रजोगामेन

कारकचक्रं ॥१८॥

यतीतिवत् तन्निष्ठकर्मकत्वात् संयोगावच्छिन्नद्रवद्रव्यव्यापारार्थकत्वेन तदवच्छेदकफलद्वयाभावात् । नादः शक्रियावच्छिन्न
व्यापारार्थकत्वे चैतादृशक्रियायामेव द्वितीयार्थविहितान्वयादिति तत्र क्रियावच्छेदकसंयोगे च चतुर्थ्यर्थस्योद्दे
श्यत्वस्यैवान्वयात् । फलवत्त्वेन तत्त्वे वस्तु सति कल्पनात् । न चैवमजां ग्रामं नयतीत्यत्रापि ग्रामस्य संप्रदानत्वापत्तिः
तथाहि । गमनानुकूलव्यापारप्रेरणादिर्धात्वर्थः द्वितीयाद्वयस्य वृत्तित्वमर्थः । धात्वर्थतावच्छेदकगमनैकदेशसंयो
गे ग्रामपदोत्तरद्वितीयार्थस्य गमने चाजापदोत्तरद्वितीयार्थस्य वृत्तित्वस्यान्वयः । एवं च ग्रामवृत्तिसंयोगजनकाजावृ
त्तिगमनावच्छिन्नव्यापारानुकूलकृतिमानित्यन्वयधीः तथा चाजाजन्यफलभागित्वेनोद्देश्यत्वे ग्रामस्याप्रत्ययात्
न संप्रदानता यत्र तु तयोरुद्देश्यत्वं विवक्ष्यते तदाजा ग्रामाय नयतीति प्रयोगो न भवत्येवेत्याहुः । वस्तुतस्तु त्यक्तुः त्यज्य
मानद्रव्यस्वत्वभागित्वेनोद्देश्यत्वं संप्रदानत्वं त्यागविशेषश्चात्र त्यागः । तेन विक्रयादौ क्रेत्रादेर्न संप्रदानत्वं । श्राद्धे नरे
पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वं किंतु प्रीतिभागित्वेनेति । अत एव संप्रदाने चतुर्थ्यसंभवात् नमः स्वस्तीत्यादिसूत्रेण चतु
र्थीविधानं तत्र रुद्राय बलिं ददातीत्यादौ स्वत्वभागित्वेनोद्देश्यत्वं । एवं कर्मणा यमभिप्रैति स संप्रदानमिति सूत्रमप्येतत्परतया व्याख्ये
यं । कर्मणा दानकर्मणा यमभिप्रैति स्वत्वभागित्वेनोद्देश्यीकरोति तत् संप्रदानमिति । एवं च संप्रदीयतेऽस्मै इति व्युत्प राम ॥१८॥

ख्यः संप्रदानसंज्ञापि मुख्ये एव वृक्षायोदकमासिञ्चतीत्यादौ वृक्षादेः संप्रदानप्रयोगो गौणः चतुर्थी च तादर्थ्ये । अत एव शत्रवेऽस्त्रं मुं
चतीति भिन्नाय हूतं प्रेषयतीत्यादौ व्याख्यातार्थतावच्छेदकफलोद्देश्यत्वाभावेऽपि चतुर्थीप्रयोग उपपद्यते विभागानुकूलक्रिया
वच्छिन्नव्यापारो मोचनं गमनानुकूलव्यापारः प्रेषणं । तदवच्छेदकविभागसंयोगादिशालित्वेन शत्रुभिन्नयोरुद्देश्य
त्वात् तथा चैतच्छत्रुदत्तादिजन्यफलपत्रवाधस्वजन्यफलदुःखादि हूतजन्यफलवार्त्तोद्भावनादिशालित्वेनोद्देश्यत्वमेव गौ
णचतुर्थ्यर्थः । न चैवं गुरुप्रीतिमुद्दिश्य गुरुपुत्राय धनं गुरवे ददातीति स्यात् । तथा विवक्षायामिष्टत्वात् । अत एव यत्र र
जकसंबंधित्वेनास्य विषयत्वं रजकस्य वस्त्रं ददातीति प्रयोगः । यत्र वस्त्रजन्यफलभागित्वेनोद्देश्यत्वं तत्रास्य विष
यत्वं रजकाय वस्त्रं ददातीति प्रयोगो भवत्येव । न चैवं श्राद्धादावपि पित्रादेः प्रीतिभागितयोद्देश्यत्वात् गौणसंप्रदान
त्वेन संप्रदाने चतुर्थ्येवोपपत्तेः । नमः स्वस्तीत्यादिसूत्रं व्यर्थमिति वाच्यं । यत्र किंचित्क्रियाकर्मजन्यफलभागित्वेनो
द्देश्यत्वस्यैव गौणसंप्रदानत्वेन नमःपदादेः क्रियाभावेन पृथक्सूत्रप्रणयनात् । नारदाय रोचते कलहः देवदत्ताय शतं
धारयतीत्यादौ तु नारदादेर्न संप्रदानता रुच्यर्थानां प्रीयमाणः धारेरुत्तमर्ण इति सूत्रद्वयेन संबंधमात्रे चतुर्थी विधीयते
तत्र चतुर्थ्याः संबंधो धातुना रुचिराख्यातेन वा विषयतानिरूप्यते नारदस्य रुचिविषयः कलहः देवदत्तस्य पुनर्दानमंगीकृ

कारकचक्र
॥१०॥ स्य द्रव्यग्रहणे चारणं वैश्यघातकर्मकत्वादर्शग्रहणं। अयं इति चोत्स्यस्यान्वयधीः। संप्रदानस्य कारकत्वं चोत्सर्गेणावच्छेदकत्व
त्वप्याउ
वस्तुनिष्पादकत्वमादरस्वत्वानुमतिप्रकाशनेन कर्तुरिच्छामुत्पादयन्निष्पादनेनैवेति। त्यागजन्यस्वत्वजनकस्वीकारवत्वं
प्रदानत्वं। श्राद्धादौ पित्रादेर्न स्वीकारः द्रव्यगोदानादौ त्वाद्यवधिसंप्रदानत्वं गौणं देव्यस्वरूपमपि त्वाहुः। परकीयक्रियाजन्
न्यविभागाश्रयत्वमपादानत्वं वृक्षात् पर्णं पततीत्यादौ पतनाश्रयस्य पत्रादेरपादानत्ववारणाय परकीयेति। अत्र पञ्चम्या
द्विभागजनकत्वं अन्योन्याभावप्रतियोगितावच्छेदकं चाभिधीयते। विभागोऽन्योन्याभावे चवृत्तोऽधिकरणत्वेनान्वीयते एवं
च वृक्षवृत्तिविभागजनकवृक्षवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकपतनाश्रयः पत्रमित्यन्वयधीः। अत्र च धातुपर्यन्तावच्छे न
च्छेदकत्वेन विभागो विशेष्यः तेन वृक्षं त्यजति खगः इत्यादौ वृक्षस्य नापादानत्वं यत्तु विभागावच्छिन्नक्रियामात्रं त्यजधात्व
र्थः तया विभागविशिष्टक्रियाया जन्यत्वाभावान्न तत्पर्यन्तावच्छेदकत्वं तदसत्। तत्काले स्पन्दः संयोगावच्छिन्नक्रियाया एव पतिजन्यत्वे
नयजसमानमिति। एवं च ग्रामादागच्छतीत्यादौ गमनादिजन्यविभागाश्रयत्वेन ग्रामादेरपादानत्वं अवधावयं धात्वर्थेन
यावदनुपपत्तौ विभागपर्यवसायः संयोगस्याजनकत्वादसंभवापत्तेः न तदुपलक्षितत्वं पादानमिति पाणिनिसूत्रं अपायो विभागोऽ
वे निश्चलत्वं तद्विभागजनकक्रियाशून्यमिति तदर्थः। धावतोऽश्वात् पततीत्यादौ तु पञ्चमी नेत्यत्र सूत्रेणानुशिष्टा। तदर्थे न तु मातर राम
॥१०॥

विधेयं। वस्तुतस्तु विभागजनकत्वं यत्र क्रियायामन्वीयते तन्न क्रियाशून्यमर्थः। तेन धावतोऽश्वात् पततीत्यादौ न काप्यनुप
पत्तिः। अत्र पतनक्रियायामेव पञ्चम्यर्थविभागजनकत्वान्वये तदवच्छिन्नधावनक्रियामात्रेऽनन्वयात्। विभागेऽवधित्व
मेतन्मते पञ्चम्यर्थः। अवधित्वं च स्वरूपसंबन्धविशेषः प्रतीतिबलात् कल्प्यते तेन धावतोऽश्वात् पततीत्यादौ सक्रियस्याश्वादेरपा
दानत्वं नानुपपन्नं। अत एव वृक्षपर्णयोः क्रिययापत्रस्य विभागेऽपि वृक्षस्यावधित्वोपपत्तिरिति तु कश्चित्। वृक्षाद्विभजते इ
त्यादौ तु विभागावधित्वमपादानत्वं। अवधित्वमवधिमत्त्वं वा स्वरूपसंबन्धरूपं पञ्चम्यर्थः। एवं च वृक्षावधिकविभागाश्रयं
पर्णमित्येवान्वयबोधः। न चैवं वृक्षाद्विभजते इत्यपि स्यादिति वाच्यं। स्वप्रतियोगिकत्वविशिष्टसंयोगध्वंसवत्त्वावधिकत्ववि
शिष्टविभागाश्रयत्वस्य तद्भिन्नाभावात्। इत्थं चापादानपदं पञ्चमीत्वं नानार्थमेवान चैवं परकीयस्पन्दजन्यविभागाश्र
इत्यपि स्याद् न। यत्वेऽपि न वृक्षात् पर्णं स्पन्दते इति वाच्यं परकीयक्रियेत्यत्र क्रियापदेन सकर्मकधात्वर्थस्य विवक्षितत्वात्। आख्यातार्थेतरतोः
पतिजातीत्यादौ पञ्चमी नापादाने किंतु भीत्रार्थानां भयहेतुरिति सूत्रेणानुशिष्टा या पञ्चम्या हेतुत्वमर्थः व्याघ्रो भयप्रयोजकत्वे
भयाभाववत्प्रीतिः पञ्चम्यर्थो हेतुत्वं धात्वर्थभयधात्वर्थतावच्छेदकं चमूर्थेऽन्वेति। अव्याप्तादौ अयत्वं तद्वदि त्वापा
अपारब्धादौ हेतौ चेह तु पञ्चम्येवोपपत्तोपलक्षणं सूत्रप्रणयनस्येव प्रपञ्चार्थमिति तिनव्याख्याहेतु कर्मयोरयं ताप्यं तु कर्म

का॰ व॰ ॥११॥ यामावानुकूलव्यापारवानिति चान्वयधीः। एवं कूपादंधं वारयतीत्यादौ पंचम्याः पतनं द्वितीयायाश्चार्थस्तदेकदेशप्रतिबंधानु-
नवृत्तित्वं धातोः प्रतिबंधानुकूलव्यापारोऽर्थः। तथा चांधवृत्तिकूपपतनप्रतिबंधानुकूलव्यापारानुकूलकृतिमानिति। कथंचिन्नु
नयुक्तः। यत्र कूपे कस्यापि पतनमप्रसिद्धं तत्रासंभवात्। अत एव द्वितीयायाः पतनं पंचम्याश्चार्थत्वमपि वृत्तित्वं धातोरभा-
वानुकूलव्यापारोऽर्थः। तथा च कूपवृत्त्यंधपतनाभावानुकूलव्यापारविषयकालवानित्यन्वयधीरिति न युक्तः। यदंधस्य पतन-
मप्रसिद्धं तत्रासंभवात्। किंतु धातोरभावानुकूलव्यापारः पंचम्या वृत्तित्वं द्वितीयायाः प्रतियोगित्वमनुयोगित्वं वा धात्वर्थता-
वच्छेदकीभूताभावान्वितमर्थः। अभावः कूपादिसमभिव्याहारादिवशात् पतनादिना संबंधेन बोध्यः। एवं च पतनादिसंबंधेन
कूपवृत्त्यंधप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवानित्यन्वयधीः। एतस्मात् सविधान्नादनुमित्रं वारयतीत्या-
दौ यत् सविधान्नस्य पतनमित्यत्र यन्न भोजनमप्रसिद्धं तत्राविभोजनादिसंबंधेन सविधान्नवृत्तिमित्रप्रतियोगिकाभावा-
नुकूलव्यापारविषयकयत्नवानित्यन्वयधीः। कूपादंधमिति स्यात् असविधान्नादनुमित्रमित्यत्र च यथायथं धातोः पतनं भोज-
नमभावानुकूलव्यापारश्चार्थः। पंचम्याश्च यथायथं स्वार्थवृत्तित्वादि द्वितीयायाः कर्तृत्वान्वितद्वित्वविशिष्टवृत्तित्वं कर्मत्वं चार्थः राम
द्वितीयायाः कर्तृत्वमर्थः। धात्वर्थतावच्छेदकीभूते चाभावे धात्वर्थस्य पतनादेरधिकरणत्वेन द्वित्वावच्छिन्नस्य पंचम्यर्थ इति ॥११॥

लादिकर्तृत्वमित्यस्य च प्रतियोगित्वेनान्वयो व्युत्पत्तिवैचित्र्यात्। एवं च पतनसामान्ये कूपवृत्तित्वांधकर्तृकत्वोभयाभावानुकू-
लव्यापारः द्वितीयायाः पारविषयकयत्नवानित्याद्यस्य भोजनसामान्यसविधान्नकर्मकत्वमित्रकर्तृकत्वोभयाभावानुकूलव्यापार-
विषयकयत्नवानिति द्वितीयस्य बोधः। एवमेवाकाशं न पश्यतीत्यादौ घटादावाकाशविषयकदर्शनस्य घटवृत्तिदर्शनस्य चा-
प्रसिद्ध्या वसमापादीत्यादावन्वयबोधो दुर्घट इति तत्र द्वितीयाया विषयित्वरूपं कर्मत्वं लक्षणया च घटवृत्तित्वं द्वित्वं बोध्यते।
धातुना चालौकिकभिन्नजन्यप्रत्यक्षं तत्रैव द्वित्वावच्छिन्नद्वितीयार्थान्वितनञर्थस्यान्वयः। आख्यातस्य तादृशोभयाभावा-
न्वितनिरूपकत्वमर्थः। तथा चालौकिकभिन्नजन्यप्रत्यक्षसामान्ये आकाशविषयित्वघटवृत्तित्वोभयाभावनिरूपको घट
इत्यन्वयबोधः। न चाकाशं न पश्यत्यंधो वह्न्यादौ समवायसंबंधेनाभाववृत्तित्वाप्रसिद्ध्या नोक्तक्रमेणान्वयसंभव इति
वाच्यं। तत्र हि धात्वर्थनिरूढालौकिकप्रत्यक्षप्रतियोगित्वं समवायस्यार्थः। द्वितीयायाश्च विषयप्रतियोगिकत्वमभावानुयो-
गिकत्वं वृत्तित्वं चार्थः। एकदेशे च विषयित्वेन प्रत्यक्षस्याकाशादिनिरूपकत्वेनान्वयः। तथा च समवायसंबंधसामान्ये आका-
शविषयप्रतियोगिकत्वनिरूढालौकिकप्रत्यक्षप्रतियोगिकत्वाभावानुयोगिकत्वेतत्रित्वावच्छिन्नसमयोऽभावस्तन्निरूप-
कोऽयमिति बहुत्वान्वयः। केचित्तु तत्र धात्वर्थनिरूढालौकिकप्रत्यक्षसमवायोऽर्थः। द्वितीयायाश्च प्रतियोगिकत्वमभावानुयोगि-
यदा विषयि

का॰च॰ कलैद्धि ८३ हेत्वर्थः। विषयित्वेचएकदेशेप्रकृत्यर्थस्याकाशस्यनिरूपकतयान्वयः। तथाचनिरुक्तलौकिकप्रत्ययसमवा
॥१२॥ येऽम्बाकाशविषयिप्रतियोगिकत्वाभावानुयोगिकत्वोभयं। तावच्छिन्नस्ययोऽभावस्तन्निरूपकोऽभावइत्यन्वयबोधः। अतएव
दिशा। अप्रसिद्धस्यत्वेवोधाद्यस्ययाद्युपिवदंतिहिमवतोगंगाप्रभवतीत्यादौनपंचम्याहेतुत्वंधातुनाचोत्पत्तिर्बोध्यते।
तथासतिजनिकर्तुःप्रकृतिरित्येतएवउपपत्तेनुक्तेःप्रभवइतिसूत्रप्रणयनवैयर्थ्यापत्तेः। किंतुप्रकर्षेणाभवनंप्रभवःप्रका
शः आद्यबहिःसंयोगइतियावत्। सएवहिप्रालभ्यार्थः। बहिःपदार्थः। प्रकृतेष्वखंडमेव। पंचम्यर्थःसंयोगध्वंसाव्यवहितोत्त
रवर्त्तित्वमाख्यातार्थआश्रयता तथाचहिमालयसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यपृथिवीसंयोगाश्रयत्वगंगे
त्यन्वयधीः। वैकुंठात्काशीतोवागंगाप्रभवतीत्यप्रयोगात्। अव्यवहितेतिआद्येतिचावैकुंठसंयोगध्वंसाव्यवहितोत्तरक्ष
णेभूसंबंधस्यकाशीसंयोगध्वंसाव्यवहितोत्तरक्षणेबाधस्यतत्प्राभावात्। वल्मीकाग्रात्प्रभवतिधनुःखंडमाखंडलस्य
त्यादावपिएवमेवचात्वर्थः। परंतुवल्मीकाग्रोद्देशोबहिःपदार्थइतिविशेषः। कस्मात्पराजयतेशिशुपालः। अध्ययना
त्पराजयतेबालकइत्यादौतुधातोरसहिष्णुतापंचम्याःकर्मत्वमाख्यातस्याश्रयत्वमर्थः। श्रीकृष्णंनसहतेअध्ययनंनस
हतइतितदर्थविवरणात्। असहिष्णुताद्यविशेषोऽपिमवाप्रकालज्ञानंअशक्यत्वज्ञानंवाइत्थंचश्रीकृष्णविषयकेछ राम ॥१२॥

अध्ययन२ ६

वान्श्रीकृष्णविषयकाप्रमवाशक्यत्वज्ञानवान्वाइत्याद्यस्यपुत्रविषयकाशक्यत्वज्ञानवानित्यस्यबोधः। विप्राद्बिभ्यन्मादत्त
इत्यादौपंचम्यायथेष्टविनियोगार्थानतुस्वत्वंचौराद्बिभ्यन्माददत्तइत्यादौचौरस्यस्वत्वाभावेनतद्दसंभवात्। धातोरपियथेष्टविनि
योगफलकस्वीकारार्थानतुस्वत्वजनकस्वीकारः। विप्राद्बिभ्यन्माददत्तेचौरइत्यादौचौरस्यतद्दसंभवात्। पंचम्यर्थविनियोगस्यचा
व्यवहितोत्तरत्वसंबंधेनधात्वर्थतावच्छेदकविनियोगेऽन्वयः। अव्यवहितोत्तरत्वंचस्वसमानविषयकपुरुषांतरीयविनियो म
गाव्यवहितत्वमिन्नत्वंतेनमद्दत्तःप्रतिगृह्यविप्रेणदत्तंधनमाददातेऽस्मद्दत्तंनइतिनप्रयोगः। इत्थंचविप्रीयथेष्टविनि
योगाव्यवहितोत्तरधनवृत्तियथेष्टविनियोगफलकस्वीकारवानयमित्यन्वयबोधः। अधर्माज्जुगुप्सनइत्यत्रपंचम्याः गु
कर्मत्वंधातोर्निंदार्थः। अधर्मंनिंदतीत्यर्थः। अधर्माद्विरमतीत्यादौधातोःकरणानंतरमकरणंपंचम्याःकर्मत्वमर्थः। सच
करणेऽकरणेचान्वेति। अधर्मंकृत्वापुनर्नकरोतीत्यर्थः। एवंधर्मात्प्रमाद्यतीत्यादौपंचम्याविषयित्वंधातोरनवधानं
आख्यातस्यचाश्रयत्वमर्थः। धर्मविषयकानवधानाश्रयइतिशाब्दधीः। उपाध्यायादंतर्धत्तेशिष्यइत्यादौधातोःस्वविष
यकप्रत्यक्षविरोधिव्यापारःपंचम्याःसंबंधित्वंधात्वर्थतावच्छेदकप्रत्यक्षान्वितमाख्यातस्यकृतिरर्थः। उपाध्यायसंबंधि
स्वविषयकप्रत्यक्षविरोधिव्यापारानुकूलकृतिमानितिचान्वयधीः। ईडातघटःधूमाद्वह्निमानित्यादौपंचमीनापादाने
क्रियायोगाभावात्। किंतुजनकत्वज्ञापकत्वरूपेणान्यत्वज्ञाप्यत्वेवाहेतुहेतुमद्भावेहेतुत्वादितिसूत्रेणानुशिष्टा। नचैवंजनि

कारकवादः ॥१३॥ कर्तुः प्रकृतिरिति सूत्रं अर्थः। काष्ठात् पचतीत्यत्र एवं दण्डाज्जायते इत्यत्रावधित्वनिरूपयाञ्चलपनिरूपितहेतुत्वस्यापि हे
तावितिसूत्रेणैवसम्भवादितिवाच्यं। उक्तस्य चेतरहेतुकत्वेपि सावधिकत्वादुक्तनिरूपितता दृशस्वरूपसंबंधस्य हेतुत्वादन्य
त्वेन हेताविति सूत्रेणापञ्चम्या अभावात्। अधिकरणत्वं च नत्वर्थसंबंधः। संबंधस्य संयोगादिरूपस्य क्लिष्टत्वादिदंदरपि
कुण्डाधारतापन्नं न च कुण्डं न बदरस्य मेदिनीति वाच्यं। अतोहि स्वधर्मसंबंधोऽधिकरणत्वं पर्यवसितं स्वधर्मत्वं चाधेयत्वं स्वाधे
यत्वं च यदि स्वनिरूपिताधिकरणसंबंधित्वं तदा अन्योन्याश्रयः। अन्यच्च दुर्वचं। नापि दुत्वत्तत्वयस्थितत्वयत्तत्त्वं वा प(?)सः
णीयमधिकरणं। उक्तनये चाभिप्रसणीयं च कार्यस्य समवायिकारणं। स्थितत्वं घटादेर्भूतलादिः। तत्वेन चजात्यादेः समवायि
अभावसमवाययोः स्वरूपसंबंधीति वाच्यं। अपेक्षणीयत्वं हि न जनकत्वं। अतीन्द्रियजात्याद्यधिकरणस्यास्मदादेस्त्वलौकि
कप्रत्यक्षाभावे सन्निकर्षघटकत्वेन जनकत्वात्। इदं दृष्टिनाद्यधिकरणतापत्तेश्च। नाप्यधिकरणत्वं। आत्माश्रयात्। नो
पितद्भिन्नत्वे सति तत्पतनप्रतिबंधकसंयोगवत्त्वं भूतले पतनवद्द्रव्यस्याधिकरणत्वं मूर्त्तत्वेन विशेषणात्। नाकाशादेराधार
कसंयोगाश्रयत्वमपीश्वरे नातिव्याप्तिः। पतनस्य मूर्त्तस्य च विलक्षणतत्संयोगवत्त्वं। अधिकरणत्वं। अत एव पंकजको
रकौतरोत्तत्वविनष्टभ्रमरस्याप्यधिकरणेनाप्रसिध्या नाव्याप्तिः। गुणक्रियाजात्यादेश्च तत्तत्समवायित्वमिति। अभा
वसमवायानां च तत्तत्स्वरूपसंबंधित्वं। एवं परंपरासंबंधेनापीतिवीत्यापीतिवाच्यं। अनुगमात्। भूतले घटद्रव्यादेस्तु स राम ॥१३॥

पत

णसम्पर्वतायोगोरवात्। अननुगमाच्च। किंतु प्रतियोगित्वानुयोगित्वाधेयत्वाधिकरणत्वं च विलक्षणप्रतीतिसाक्षिकः स्व
रूपसंबंधविशेषः। स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्। तत्र गेहे पचतीत्यत्र पाकस्याश्रयः संतापनस्य साक्षात् हस्तिवापि
कर्तृघटितपरंपरयाधिकरणत्वमाधेयत्वं वा पाकादिक्रियान्वितं सप्तम्यर्थः। स्थाल्यामोदनं पचतीत्यत्राश्रयः संतापनस्य पाक
स्य साक्षात् स्थालीवृत्तित्वेपि कर्मघटितपरंपरयाधिकरणत्वमाधेयत्वं सप्तम्यर्थः। पाकादावन्वेति। अननुभववत्त्वेन तथैव
युत्पत्तेरितिवृद्धाः। तदाहुः। कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियां। उपकुर्वन् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति। एवं च कर्तृ
कर्मद्वारा क्रियाश्रयत्वे सति तत्क्रियोपकारकमधिकरणमिति। वस्तुतस्तु परंपरया क्रियाश्रयत्वमेवाधिकरणत्वं। अत एव प्रा
गुणस्य नदीर्घदण्डादिकाष्ठादिचालनक्रियावत्त्वेन गृहान्तर्वर्त्तिपाककर्त्रौकर्त्तृद्वारा क्रियानाश्रयत्वेपि गृहस्य गेहे पचतीति
प्रयोगः। न चैवं परंपरयेत्यव्यर्थं। अथ च संतापनस्यधोवह्निसंयोगानुकूलकाष्ठवह्न्यादिव्यापारस्य च साक्षात्काष्ठवत्स्या
दिवृत्तित्वेपि काष्ठवह्न्यो वा पचतीति प्रयोगानापत्तिरिति। कृतीति वा तेस्वक्षितन्यगच्छतीति प्रयोगानापादयितुं तत्पदमिति।
न चैवं क्रियानिरूपिताधिकरणत्वस्यैव सप्तम्यर्थत्वे विनाक्रियायोगं भूतले घटइत्यादिप्रयोगो न स्यादिति वाच्यं।
इष्टत्वादिति वैयाकरणाः। अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः। स च यत्र क्रियान्वयी तत्र कारकव्यवहारः। अत एव भूतले
घटइत्यादौ क्रियाभूतन्यवाक्यात् भूतलाधेयो घट इति शाब्दबोधो न तत्र वदन्तीत्याम विदुः। गेहे स्थाल्यामोदनं पचतीत्यत्र

का०कु० ॥१४॥

निरुक्तसंबंधेन गेहाधिकरणकत्वस्यात्यधिकरणकस्योदनकर्मकपाकानुकूलकृतिमानित्यन्वयधीः। भूतले घट इत्यादौ सप्त
म्या अधिकरणत्वमर्थः। तत्र च प्रकृत्यर्थस्याश्रयत्वेन प्रथमान्तार्थस्य च निरूपकत्वेनान्वयः। भूतलनिष्ठाधिकरणतानि
रूपको घट इत्यन्वयबोध इति प्राञ्चः। निरूपकत्वादेः संबंधस्य प्रतियोगितावच्छेदकत्वाभावान्। नञर्थान्वयानुपपत्त्या
आधेयत्वं सप्तम्यर्थः। तत्र च प्रकृत्यर्थस्य निरूपकतया प्रथमान्तार्थस्य चाधिकरणतयान्वयः भूतलनिरूपिताधेयत्व
वान् घट इत्यन्वयबोध इति नव्याः। चर्मणि द्वीपिनं हन्तीत्यादौ निमित्तसप्तमी। निमित्तत्वमुद्देश्यत्वं तच्च फलत्वेन फलवत्त्वेन
वा इच्छाविषयत्वं। प्रथमे मशकनिवृत्तौ धूमं करोतीति द्वितीये तु चर्मणि द्वीपिनं हन्तीत्यादि। चर्मादेः सिद्धत्वादिच्छाविषयत्वा
भावेपि साध्यीकृतयत्परफलविनियोगरूपफलवत्त्वेनोद्देश्यत्वात्। अत्र च यथायथं तादृशोद्देश्यत्वं सप्तम्यर्थः। तस्याश्च धात्वर्थे
प्रयोज्यत्वसंबंधेनान्वयः। तथा च मशकनिवृत्तिविषयकेच्छाप्रयोज्यधूमकरणाश्रयः। चर्मविषयकयत्परविनियो
गप्रकारकेच्छाप्रयोज्यद्वीपिकर्मकहननानुकूलकृतिमानिति चक्रमेणान्वयबोधः। अत्र च निमित्तात्कर्मसंयोगादस्य
नुशासनात्। यत्किंचित्कर्मप्रकारकबोधजनकधातुयोगे नियामकः। सकर्मकधातोः कर्मसमभिव्याहारेण कर्मप्रकार
कबोधजनकतायथा। द्वीपिनं हन्तीत्यादौ अकर्मकधातौ च कर्मविशिष्टस्यार्थशक्त्या अविधाजनकत्वात्सेवा। यदुदेतीत्यत्र राम
उदयगिरिशिखरमारोहतीत्यर्थकरणात्तत्कर्मविशिष्टबोधजनकत्वमविशिष्टं। अत्र रजनीस्थस्य सूर्योदयो जन्यत्वेऽपि ॥१४॥

निमित्तत्वं ज्ञानविषयत्वेनोद्देश्यत्वात्तेन लोकानां रजनीस्थयज्ञानार्थं यदुदेतीत्यर्थः। शरदि पुष्यन्ति सप्तच्छदा इत्यादावुत्पत्तिर
पि सप्तम्यर्थः। शरदुत्पत्तिकपुष्पाश्रयाः सप्तच्छदा इति वाक्यार्थः। न च शरदुत्पत्तिकपुष्पाश्रये चंपकादावपि तथाप्रयोगः स्या
दिति वाच्यं। सप्तच्छदस्य पुष्पाश्रयत्वेन लब्धे समानवित्तिवेद्यतया सप्तच्छदवृत्तित्वस्यापि पुष्पेषु लाभात् तदवच्छेदेन शरदु
त्पत्तिकत्वान्वये साकांक्षत्वसिद्धत्वात्। चंपकादिपुष्पत्वावच्छेदेन शरदुत्पत्तिकत्वाभावेन तथा प्रयोगाभावात्। धातोः सम
वृद्धौ यत्पुष्पे लक्षणा निरूढेति तत्। सति सप्तम्याः सामानाधिकरण्यमर्थः। तत्र कचित् कालिकं कचिद्दैशिकं। तत्राद्ये समान
कालीनत्वपर्यवसन्नं। गोषु दुह्यमानासु गतः दुग्धासु आगत इत्यादौ। अत्र च समानकालीनत्वेन सप्तम्यर्थदोहनमात्रस्य
न निरूपकत्वेनान्वयः। महिष्यादिदोहसमानकालीनेन तथा प्रयोगात्। नापि गोदोहनस्य तु तागोदोहनत्वेनानुपपत्ति
तेः। किंतु दण्डीपुरुषो गच्छतीत्यत्र यथा परंपरापुरुषविशेषणतापन्नदण्डसमानकालीनत्वं गमने भासते। तथा गोवि
शेषणकर्मताविशेषणतापन्नस्य दोहनस्य समानकालीनत्वं गमने भासत इति इत्थं च तादृशदोहनसमानकालीनगमना
नुकूलातीतकृतिमानिति वाक्यार्थः। दुग्धासु आगत इत्यादौ नञ्यत्वार्थः दोहनस्यातीतत्वेन [redacted] बोधात्। किंतु दुह
नानेध्वंसप्रतियोगिक इति जन्यदोहनकर्मतापन्नासु गोषु आगत इति वाक्यार्थः। गोविशेषणकर्मताविशेषणदोहनध्वंसवि
शेषणप्रतियोगित्वविशेषणतापन्नस्य वर्तमानध्वंसस्य समानकालीनत्वं गमने भासते। तथा च तादृशवर्तमानध्वंससमा

ना

१५ न कालीनागमनानूकूलकृतिमानितिवा कर्याः ॥ गुणकर्मान्यत्वे सति सत्वादिमत्वे चैदेशिकं तत्र हि गुणकर्मान्यत्व सामानाधि
करण्यस्य सत्वे बोध्यात् यद्यपि यस्य च भावेन भाव व लक्षणमिति सूत्र क्रियायाः सामानाधिकरण्य सप्तमी विधानात् भावार्थयोः
सामानाधिकरण्यस्य सप्तमीन युक्ता । तथापि गुणकर्मान्यत्वे सति सत्वादित्वमित्युक्तप्रयोगदर्शनात् सूत्रे भावपद चमत्करतया
व्याख्याय तत्तगमनीयाः । यस्य च धर्मेण धर्मान्तरं निरूप्य स्व सामानाधिकरण्येन प्रतिपाद्यते तत्र सप्तमीति सूत्रार्थः । यस्य कि
याभावमन्यस्य क्रियान्तरं लक्ष्यते इति व्याख्यानं तु णाविकं भिमायिकं ॥ ॥ इति श्री शाकद्वीपी सारस्वत महीमवानन्दसिद्धान्त
वागीशविरचितं षट्कारकविवेचनं समाप्तं ॥ ॥ शुभमस्तु ॥ ॥ संवत् १७८२ श्रावण कृष्णपक्षे नवम्यां संपादितमिदं पु
स्तकं गंगारामेण ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥